.. Shri Anjaneya or Hanuman Stotra of 1000 Names ..

# ॥ श्री आञ्जनेय सहस्रनामस्तोत्रम् ॥

उद्यदादित्य संकाशं उदार भुज विक्रमम् ।
कन्दर्प कोटि लावण्यं सर्व विद्या विशारदम् ॥

श्री राम हृदयानंदं भक्त कल्प महीरुहम् ।
अभयं वरदं दोर्भ्यां कलये मारुतात्मजम् ॥

अथ सहस्रनाम स्तोत्रम् ।

हनुमान् श्री प्रदो वायु पुत्रो रुद्रो अनघो अजरः ।
अमृत्युर् वीरवीरश्च ग्रामावासो जनाश्रयः ॥ १॥

धनदो निर्गुणः शूरो वीरो निधिपतिर् मुनिः ।
पिङ्गाक्षो वरदो वाग्मी सीता शोक विनाशकः ॥ २॥

शिवः शर्वः परो अव्यक्तो व्यक्ताव्यक्तो धराधरः ।
पिङ्गकेशः पिङ्गरोमा श्रुतिगम्यः सनातनः ॥ ३॥

अनादिर्भगवान् देवो विश्व हेतुर् निराश्रयः ।
आरोग्यकर्ता विश्वेशो विश्वनाथो हरीश्वरः ॥ ४॥

भर्गो रामो राम भक्तः कल्याणः प्रकृति स्थिरः ।
विश्वम्भरो विश्वमूर्तिः विश्वाकारश्च विश्वपाः ॥ ५॥

विश्वात्मा विश्वसेव्यो अथ विश्वो विश्वहरो रविः ।
विश्वचेष्टो विश्वगम्यो विश्वध्येयः कलाधरः ॥ ६॥

प्लवंगमः कपिश्रेष्टो वेदवेद्यो वनेचरः ।
बालो वृद्धो युवा तत्त्वं तत्त्वगम्यः सुखो ह्यजः ॥ ७॥

अन्जनासूनुरव्यग्रो ग्राम ख्यातो धराधरः ।
भूर्भुवस्स्वर्महर्लोको जनो लोकस्तपो अव्ययः ॥ ८॥

सत्यं ओम्कार गम्यश्च प्रणवो व्यापको अमलः ।
शिवो धर्म प्रतिष्ठाता रामेष्टः फल्गुणप्रियः ॥ ९॥

गोष्पदीकृतवारीशः पूर्णकामो धरापतिः ।
रक्षोघ्नः पुण्डरीकाक्षः शरणागतवत्सलः ॥ १०॥

जानकी प्राण दाता च रक्षः प्राणापहारकः ।
पूर्णसत्त्वः पीतवासा दिवाकर समप्रभः ॥ ११॥

द्रोणहर्ता शक्तिनेता शक्ति राक्षस मारकः ।
अक्षघ्नो रामदूतश्च शाकिनी जीव हारकः ॥ १२॥

भुभुकार हतारातिर्दुष्ट गर्व प्रमर्दनः ।
हेतुः सहेतुः प्रंशुश्च विश्वभर्ता जगद्गुरुः ॥ १३॥

जगत्त्राता जगन्नथो जगदीशो जनेश्वरः ।
जगत्पिता हरिः श्रीशो गरुडस्मयभंजनः ॥ १४॥

पार्थध्वजो वायुसुतो अमित पुच्छो अमित प्रभः ।
ब्रह्म पुच्छं परब्रह्मापुच्छो रामेष्ट एव च ॥ १५॥

सुग्रीवादि युतो ज्ञानी वानरो वानरेश्वरः ।
कल्पस्थायी चिरंजीवी प्रसन्नश्च सदा शिवः ॥ १६॥

सन्नतिः सद्गतिः भुक्ति मुक्तिदः कीर्ति दायकः ।
कीर्तिः कीर्तिप्रदश्चैव समुद्रः श्रीप्रदः शिवः ॥ १७॥

उदधिक्रमणो देवः संसार भय नाशनः ।
वार्धि बंधनकृद् विश्व जेता विश्व प्रतिष्ठितः ॥ १८॥

लंकारिः कालपुरुषो लंकेश गृह भंजनः ।
भूतावासो वासुदेवो वसुस्त्रिभुवनेश्वरः ॥ १९॥

श्रीरामदूतः कृष्णश्च लंकाप्रासादभंजकः ।
कृष्णः कृष्ण स्तुतः शान्तः शान्तिदो विश्वपावनः ॥ २०॥

विश्व भोक्ता च मारघ्नो ब्रह्मचारी जितेन्द्रियः ।
ऊर्ध्वगो लान्गुली मालि लान्गूल हत राक्षसः ॥ २१॥

समीर तनुजो वीरो वीरमारो जयप्रदः ।
जगन्मन्गालदः पुण्यः पुण्य श्रवण कीर्तनः ॥ २२॥

पुण्यकीर्तिः पुण्य गतिर्जगत्पावन पावनः ।
देवेशो जितमारश्च राम भक्ति विधायकः ॥ २३॥

ध्याता ध्येयो भगः साक्षी चेत चैतन्य विग्रहः ।
ज्ञानदः प्राणदः प्राणो जगत्प्राणः समीरणः ॥ २४॥

विभीषण प्रियः शूरः पिप्पलायन सिद्धिदः ।

सुहृत् सिद्धाश्रयः कालः काल भक्षक भंजनः ॥ २५ ॥

लंकेश निधनः स्थायी लंका दाहक ईश्वरः ।
चन्द्र सूर्य अग्नि नेत्रश्च कालाग्निः प्रलयान्तकः ॥ २६ ॥

कपिलः कपीशः पुण्यराशिः द्वादश राशिगः ।
सर्वाश्रयो अप्रमेयत्मा रेवत्यादि निवारकः ॥ २७ ॥

लक्ष्मण प्राणदाता च सीता जीवन हेतुकः ।
रामध्येयो हृषीकेशो विष्णु भक्तो जटी बली ॥ २८ ॥

देवारिदर्पहा होता कर्ता हर्ता जगत्प्रभुः ।
नगर ग्राम पालश्च शुद्धो बुद्धो निरन्तरः ॥ २९ ॥

निरंजनो निर्विकल्पो गुणातीतो भयंकरः ।
हनुमांश्च दुराराध्यः तपस्साध्यो महेश्वरः ॥ ३० ॥

जानकी घनशोकोत्थतापहर्ता परात्परः ।
वाडंभ्यः सदसद्रूपः कारणं प्रकृतेः परः ॥ ३१ ॥

भाग्यदो निर्मलो नेता पुच्छ लंका विदाहकः ।
पुच्छबद्धो यातुधानो यातुधान रिपुप्रियः ॥ ३२ ॥

चायापहारी भूतेशो लोकेश सद्गति प्रदः ।
प्लवंगमेश्वरः क्रोधः क्रोध संरक्तलोचनः ॥ ३३ ॥

क्रोध हर्ता ताप हर्ता भाक्ताभय वरप्रदः।
भक्तानुकंपी विश्वेशः पुरुहूतः पुरंदरः ॥ ३४ ॥

अग्निर्विभावसुर्भास्वान् यमो निष्कृतिरेवच ।
वरुणो वायुगतिमान् वायुः कौबेर ईश्वरः ॥ ३५ ॥

रविश्चन्द्रः कुजः सौम्यो गुरुः काव्यः शनैश्वरः ।
राहुः केतुर्मरुद्धाता धर्ता हर्ता समीरजः ॥ ३६ ॥

मशकीकृत देवारि दैत्यारिः मधुसूदनः ।
कामः कपिः कामपालः कपिलो विश्व जीवनः ॥ ३७ ॥

भागीरथी पदांभोजः सेतुबंध विशारदः ।
स्वाहा स्वधा हविः कव्यं हव्यवाह प्रकाशकः ॥ ३८ ॥

स्वप्रकाशो महावीरो लघुश्च अमित विक्रमः ।
प्रडीनोड्डीनगतिमान् सद्गतिः पुरुषोत्तमः ॥ ३९ ॥

जगदात्मा जगध्योनिर्जगदंतो ह्यनंतकः ।
विपाप्मा निष्कलंकश्च महान् मदहंकृतिः ॥ ४० ॥

खं वायुः पृथ्वी ह्यापो वह्निर्दिक्पाल एव च ।
क्षेत्रज्ञः क्षेत्र पालश्च पल्वलीकृत सागरः ॥ ४१ ॥

हिरण्मयः पुराणश्च खेचरो भुचरो मनुः ।
हिरण्यगर्भः सूत्रात्मा राजराजो विशांपतिः ॥ ४२ ॥

वेदांत वेद्यो उद्गीथो वेदवेदंग पारगः ।
प्रति ग्रामस्थितः साध्यः स्फूर्ति दात गुणाकरः ॥ ४३ ॥

नक्षत्र माली भूतात्मा सुरभिः कल्प पादपः ।
चिन्ता मणिर्गुणनिधिः प्रजा पतिरनुत्तमः ॥ ४४ ॥

पुण्यश्लोकः पुरारातिर्ज्योतिष्मान् शर्वरीपतिः ।
किलिकिल्यारवत्रस्तप्रेतभूतपिशाचकः ॥ ४५ ॥

रुणत्रय हरः सूक्ष्मः स्तूलः सर्वगतिः पुमान् ।
अपस्मार हरः स्मर्ता शृतिर्गाथा स्मृतिर्मनुः ॥ ४६ ॥

स्वर्ग द्वारं प्रजा द्वारं मोक्ष द्वारं कपीश्वरः ।
नाद रूपः पर ब्रह्म ब्रह्म ब्रह्म पुरातनः ॥ ४७ ॥

एको नैको जनः शुक्लः स्वयं ज्योतिर्नाकुलः ।
ज्योतिः ज्योतिरनादिश्च सात्त्विको राजसत्तमः ॥ ४८ ॥

तमो हर्ता निरालंबो निराकारो गुणाकरः ।
गुणाश्रयो गुणमयो बृहत्कायो बृहद्यशः ॥ ४९ ॥

बृहद्धनुर् बृहत्पादो बृहन्मूर्धा बृहत्स्वनः ।
बृहत् कर्णो बृहन्नासो बृहन्नेत्रो बृहत्गलः ॥ ५० ॥

बृहध्यन्त्रो बृहत्चेष्टो बृहत् पुच्छो बृहत् करः ।
बृहत्गातिर्बृहत्सेव्यो बृहल्लोक फलप्रदः ॥५१॥

बृहच्छक्तिर्बृहद्वांछा फलदो बृहदीश्वरः ।
बृहल्लोक नुतो द्रष्टा विद्या दात जगद् गुरुः ॥ ५२ ॥

देवाचार्यः सत्य वादी ब्रह्म वादी कलाधरः ।
सप्त पातालगामी च मलयाचल संश्रयः ॥ ५३ ॥

उत्तराशास्थितः श्रीदो दिव्य औषधि वशः खगः ।
शाखामृगः कपीन्द्रश्च पुराणः श्रुति संचरः ॥ ५४ ॥

चतुरो ब्राह्मणो योगी योगगम्यः परात्परः ।
अनदि निधनो व्यासो वैकुण्ठः पृथ्वी पतिः ॥ ५५ ॥

पराजितो जितारातिः सदानन्दश्च ईशिता ।
गोपालो गोपतिर्गोप्ता कलिः कालः परात्परः ॥ ५६ ॥

मनोवेगी सदा योगी संसार भय नाशनः ।
तत्त्व दाता च तत्त्वज्ञस्तत्त्वं तत्त्व प्रकाशकः ॥ ५७ ॥

शुद्धो बुद्धो नित्यमुक्तो भक्त राजो जयप्रदः ।
प्रलयो अमित मायश्च मायातीतो विमत्सरः ॥ ५८ ॥

माया-निर्जित-रक्षाश्च माया-निर्मित-विष्टपः ।
मायाश्रयश्च निर्लेपो माया निर्वंचकः सुखः ॥ ५९ ॥

सुखी सुखप्रदो नागो महेशकृत संस्तवः ।
महेश्वरः सत्यसंधः शरभः कलि पावनः ॥ ६० ॥

रसो रसज्ञः सम्मनस्तपस्चक्षुश्च भैरवः ।
घ्राणो गन्धः स्पर्शनं च स्पर्शो अहंकारमानदः ॥ ६१ ॥

नेति-नेति-गम्यश्च वैकुण्ठ भजन प्रियः ।
गिरीशो गिरिजा कान्तो दूर्वासाः कविरंगिराः ॥ ६२ ॥

भृगुर्वसिष्टश्च यवनस्तुम्बुरुर्नारदो अमलः ।
विश्व क्षेत्रं विश्व बीजं विश्व नेत्रश्च विश्वगः ॥ ६३ ॥

याजको यजमानश्च पावकः पितरस्तथा ।
श्रद्धा बुद्धिः क्षमा तन्द्रा मन्त्रो मन्त्रयुतः स्वरः ॥ ६४ ॥

राजेन्द्रो भूपती रुण्ड माली संसार सारथिः ।
नित्यः संपूर्ण कामश्च भक्त कामधुगुत्तमः ॥ ६५ ॥

गणपः कीशपो भ्राता पिता माता च मारुतिः ।
सहस्र शीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ ६६ ॥

कामजित् काम दहनः कामः काम्य फल प्रदः ।
मुद्राहारी राक्षसघ्नः क्षिति भार हरो बलः ॥ ६७ ॥

नख दंष्ट्र युधो विष्णु भक्तो अभय वर प्रदः ।
दर्पहा दर्पदो दृप्तः शत मूर्तिरमूर्तिमान् ॥ ६८ ॥

महा निधिर्महा भोगो महा भागो महार्थदः ।
महाकारो महा योगी महा तेजा महा द्युतिः ॥ ६९ ॥

महा कर्मा महा नादो महा मन्त्रो महा मतिः ।
महाशयो महोदारो महादेवात्मको विभुः ॥ ७० ॥

रुद्र कर्मा कृत कर्मा रत्न नाभः कृतागमः ।
अम्भोधि लंघनः सिंहो नित्यो धर्मः प्रमोदनः ॥ ७१ ॥

जितामित्रो जयः सम विजयो वायु वाहनः ।
जीव दात सहस्रांशुर्मुकुन्दो भूरि दक्षिणः ॥ ७२ ॥

सिद्धर्थः सिद्धिदः सिद्ध संकल्पः सिद्धि हेतुकः ।
सप्त पातालचरणः सप्तर्षि गण वन्दितः ॥ ७३ ॥

सप्ताब्धि लंघनो वीरः सप्त द्वीपोरुमण्डलः ।
सप्तांग राज्य सुखदः सप्त मातृ निशेवितः ॥ ७४ ॥

सप्त लोकैक मुकुटः सप्त होता स्वराश्रयः ।
सप्तच्छन्दो निधिः सप्तच्छन्दः सप्त जनाश्रयः ॥ ७५ ॥

सप्त सामोपगीतश्च सप्त पातल संश्रयः ।
मेधावी कीर्तिदः शोक हारी दौर्भग्य नाशनः ॥ ७६ ॥

सर्व वश्यकरो गर्भ दोषघ्नः पुत्रपौत्रदः ।
प्रतिवादि मुखस्तंभी तुष्टचित्तः प्रसादनः ॥ ७७ ॥

पराभिचारशमनो दुःखघ्नो बंध मोक्षदः ।
नव द्वार पुराधारो नव द्वार निकेतनः ॥ ७८ ॥

नर नारायण स्तुत्यो नरनाथो महेश्वरः ।
मेखली कवची खड्गी भ्राजिष्णुर्जिष्णुसारथिः ॥ ७९ ॥

बहु योजन विस्तीर्ण पुच्छः पुच्छ हतासुरः ।
दुष्टग्रह निहंता च पिशाच ग्रह घातकः ॥ ८० ॥

बाल ग्रह विनाशी च धर्मो नेता कृपकरः ।
उग्रकृत्यश्चोग्रवेग उग्र नेत्रः शत क्रतुः ॥ ८१ ॥

शत मन्युस्तुतः स्तुत्यः स्तुतिः स्तोता महा बलः ।
समग्र गुणशाली च व्यग्रो रक्षो विनाशकः ॥ ८२ ॥

रक्षोघ्न हस्तो ब्रह्मेशः श्रीधरो भक्त वत्सलः ।
मेघ नादो मेघ रूपो मेघ वृष्टि निवारकः ॥ ८३ ॥

मेघ जीवन हेतुश्च मेघ श्यामः परात्मकः ।
समीर तनयो बोध्ह तत्त्व विद्या विशारदः ॥ ८४ ॥

अमोघो अमोघहृष्टिश्च इष्टदो अनिष्ट नाशनः ।
अर्थो अनर्थापहारी च समर्थो राम सेवकः ॥ ८५ ॥

अर्थी धन्यो असुराराति: पुण्डरीकाक्ष आत्मभूः ।
संकर्षणो विशुद्धात्मा विद्या राशिः सुरेश्वरः ॥ ८६ ॥

अचलोद्धरको नित्यः सेतुकृद् राम सारथिः ।
आनन्दः परमानन्दो मत्स्यः कूर्मो निधिःशमः ॥८७॥

वाराहो नारसिंहश्च वामनो जमदग्निजः ।
रामः कृष्णः शिवो बुद्धः कल्की रामाश्रयो हरः ॥८८॥

नन्दी भृन्गी च चण्डी च गणेशो गण सेवितः ।
कर्माध्यक्ष्यः सुराध्यक्षो विश्रामो जगतांपतिः ॥८९॥

जगन्नथः कपि श्रेष्टः सर्वावसः सदाश्रयः ।
सुग्रीवादिस्तुतः शान्तः सर्व कर्मा प्लवंगमः ॥९०॥

नखदारितरक्षाश्च नख युद्ध विशारदः ।
कुशलः सुघनः शेषो वासुकिस्तक्षकः स्वरः ॥९१॥

स्वर्ण वर्णो बलाढ्यश्च राम पूज्यो अघनाशनः ।
कैवल्य दीपः कैवल्यं गरुडः पन्नगो गुरुः ॥९२॥

किल्यारावहतारातिगर्वः पर्वत भेदनः ।
वज्रांगो वज्र वेगश्च भक्तो वज्र निवारकः ॥९३॥

नखायुधो मणिग्रीवो ज्वालामाली च भास्करः ।
प्रौढ प्रतापस्तपनो भक्त ताप निवारकः ॥९४॥

शरणं जीवनं भोक्ता नानाचेष्टोह्यचंचलः ।
सुस्वस्थो अस्वास्थ्यहा दुःखशमनः पवनात्मजः ॥९५॥

पावनः पवनः कान्तो भक्तागस्सहनो बलः ।
मेघ नादरिपुर्मेघनाद संहृतराक्षसः ॥९६॥

क्षरो अक्षरो विनीतात्मा वानरेशः सतांगतिः ।
श्री कण्टः शिति कण्टश्च सहायः सहनायकः ॥९७॥

अस्तूलस्त्वनणुर्भर्गो देवः संसृतिनाशनः ।
अध्यात्म विद्यासारश्च अध्यात्मकुशलः सुधीः ॥९८॥

अकल्मषः सत्य हेतुः सत्यगः सत्य गोचरः ।
सत्य गर्भः सत्य रूपः सत्यं सत्य पराक्रमः ॥९९॥

अन्जना प्राणलिंगच वायु वंशोद्भवः शुभः ।
भद्र रूपो रुद्र रूपः सुरूपस्चित्र रूपधृत् ॥१००॥

मैनाक वंदितः सूक्ष्म दर्शनो विजयो जयः ।
क्रान्त दिग्मण्डलो रुद्रः प्रकटीकृत विक्रमः ॥१०१॥

कम्बु कण्टः प्रसन्नात्मा ह्रस्व नासो वृकोदरः ।
लंबोष्टः कुण्डली चित्रमाली योगविदां वरः ॥१०२॥

विपश्चित् कविरानन्द विग्रहो अनन्य शासनः ।
फल्गुणीसूनुरव्यग्रो योगात्मा योगतत्परः ॥१०३॥

योग वेद्यो योग कर्ता योग योनिर्दिगंबरः ।
अकारादि क्षकारान्त वर्ण निर्मित विग्रहः ॥१०४॥

उलूखल मुखः सिंहः संस्तुतः परमेश्वरः ।
श्लिष्ट जंघः श्लिष्ट जानुः श्लिष्ट पाणिः शिखा धरः ॥१०५॥

सुशर्मा अमित शर्मा च नारयण परायणः ।
जिष्णुर्भविष्णू रोचिष्णुर्ग्रसिष्णुः स्थाणुरेव च ॥१०६॥

हरी रुद्रानुकृद् वृक्ष कंपनो भूमि कंपनः ।
गुण प्रवाहः सूत्रात्मा वीत रागः स्तुति प्रियः ॥१०७॥

नाग कन्या भय ध्वंसी रुक्म वर्णः कपाल भृत् ।
अनाकुलो भवोपायो अनपायो वेद पारगः ॥१०८॥

अक्षरः पुरुषो लोक नाथो रक्ष प्रभु दृडः ।
अष्टांग योग फलभुक् सत्य संधः पुरुष्टुतः ॥१०९॥

स्मशान स्थन निलयः प्रेत विद्रावण क्षमः ।
पंचाक्षर परः पंच मातृको रंजनध्वजः ॥११०॥

योगिनी वृन्द वंद्यश्च शत्रुघ्नो अनन्त विक्रमः ।
ब्रह्मचारी इन्द्रिय रिपुः धृतदण्डो दशात्मकः ॥१११॥

अप्रपंचः सदाचारः शूर सेना विदारकः ।
वृद्धः प्रमोद आनंदः सप्त जिह्व पतिर्धरः ॥११२॥

नव द्वार पुराधारः प्रत्यग्रः सामगायकः ।
षट्चक्रधामा स्वर्लोको भयह्यन्मानदो अमदः ॥११३॥

सर्व वश्यकरः शक्तिरनन्तो अनन्त मंगलः ।
अष्ट मूर्तिर्धरो नेता विरूपः स्वर सुन्दरः ॥११४॥

धूम केतुर्महा केतुः सत्य केतुर्महारथः ।
नन्दि प्रियः स्वतन्त्रश्च मेखली समर प्रियः ॥११५॥

लोहांगः सर्वविद् धन्वी षड्कलः शर्व ईश्वरः ।
फल भुक् फल हस्तश्च सर्व कर्म फलप्रदः ॥११६॥

धर्माध्यक्षो धर्मफलो धर्मो धर्मप्रदो अर्थदः ।

पंच विंशति तत्त्वज्ञः तारक ब्रह्म तत्परः ॥११७॥

त्रि मार्गवसतिर्भूमिः सर्व दुःख निबर्हणः ।
ऊर्जस्वान् निष्कलः शूली माली गर्जन्निशाचरः ॥११८॥

रक्तांबर धरो रक्तो रक्त माला विभूषणः ।
वन माली शुभांगश्च श्वेतः स्वेतांबरो युवा ॥११९॥

जयो जय परीवारः सहस्र वदनः कविः ।
शाकिनी डाकिनी यक्ष रक्षो भूतौघ भंजनः ॥१२०॥

सध्योजातः कामगतिर् ज्ञान मूर्तिः यशस्करः ।
शंभु तेजाः सार्वभौमो विष्णु भक्तः प्लवंगमः ॥१२१॥

चतुर्नवति मन्त्रज्ञः पौलस्त्य बल दर्पहा ।
सर्व लक्ष्मी प्रदः श्रीमान् अन्गदप्रिय ईडितः ॥१२२॥

स्मृतिर्बीजं सुरेशानः संसार भय नाशनः ।
उत्तमः श्रीपरीवारः श्री भू दुर्गा च कामाख्यक ॥१२३॥

सदागतिर्मातरिश्च राम पादाब्ज षट्पदः ।
नील प्रियो नील वर्णो नील वर्ण प्रियः सुहृत् ॥१२४॥

राम दूतो लोक बन्धुः अन्तरात्मा मनोरमः ।
श्री राम ध्यानकृद् वीरः सदा किंपुरुषस्स्तुतः ॥१२५॥

राम कार्यांतरंगश्च शुद्धिर्गतिरानमयः ।
पुण्य श्लोकः परानन्दः परेशः प्रिय सारथिः ॥१२६॥

लोक स्वामि मुक्ति दाता सर्व कारण कारणः ।
महा बलो महा वीरः पारावारगतिर्गुरुः ॥१२७॥

समस्त लोक साक्षी च समस्त सुर वंदितः ।
सीता समेत श्री राम पाद सेवा दुरंधरः ॥१२८॥

इति श्री सीता समेत श्री राम पाद सेवा दुरंधर
श्री हनुमत् सहस्र नाम स्तोत्रं संपूर्णं ॥

Saraswathy Ravishankar msr@tamu.edu

Please send corrections to sanskrit@cheerful.com
Last updated January 19, 1999